ॐ नमो बुद्धाय गुरवे नमो धर्माय तायि
ने ॥ नमः संघाय महते त्रिभ्योपि स
ततं नमः ॥ ॥ ये देवाः सन्ति मेरौ
वर कनकमये मन्दिरे ये च यक्षाः ॥
पाताले ये भुजंगा स्फटिमणिकिर
णे ध्वस्तसर्वान्धकाः ॥ कैलासे स्त्रीवि
लास प्रमुदितहृदया ये च विद्याधरे
न्द्राः ॥ ते मोक्षद्वारभूतं मुनिवरवचनं श्रो
तुमायान्ति सर्वे ॥ १ ॥ आयान्तः श्रो
तुकामा असुरसुरनराः सिद्धगन्धर्वनागा
ः ॥ कुम्भाण्डाः किन्नरेन्द्राः गरुडहरिह
राः शक्रब्रह्मादि देवाः ॥ पूजा पंचोप
चारे त्रिभुवननमितं मेदिनी दुष्टे

भयं॥भक्त्याहं वाचयामि प्रणमितशिर
सा तन्महायानसूत्रं॥ॐ नमो बुद्धाय॥
ॐ नमो धर्माय॥ॐ नमः संघाय॥ ॥
ॐ नमः श्रीमञ्जुनाथाय॥ ॥अथ वज्र
धरः श्रीमान् दुर्दान्तदमकः परः॥ त्रै
लोके विजयी वीरो गुह्यराट् कुलिशे
श्वरः॥ १ ॥विबुद्धपुण्डरीकाक्षः
प्रोत्फुल्लकमलाननः॥प्रोल्लालयन् व
ज्रवरं स्वकरेण मुहुर्मुहुः॥ २ ॥
भृकुटीतरङ्गप्रमुखैरनन्तैर्वज्रपाणि
भिः॥दुर्दान्तदमकैर्वीरैर्वीर विभत्स
रूपिभिः॥ ३ ॥उच्चालयद्भिः स्वक
रैः प्रस्फुरद्वज्रकोटिभिः॥ प्रज्ञोपाय

महाकरुणा जगदर्थकरैः परैः॥ ४
॥ हस्तनुलाशयैर्मुदितैः क्रोधविग्रह
रूपिभिः॥ बुद्धहृन्यकरैर्नाथैः सार्द्धं प्र
णानवित्रहैः॥ ५ ॥ प्रणम्य नाथं सम्बुद्धं
भगवन्तं तथागतं॥ कृतांजलिः पुटोभूत्वा
इदमाह स्थितोग्रतः॥ ६ ॥ मत्हिताय
ममार्थाय अनुकम्पायमे विभो॥ मया
जालाभिसंबोधि यथालाभिभवाम्यहं
॥ ७ ॥ अज्ञानपङ्कमग्नानां क्लेशव्याकुल
चेतसां॥ हिताय सर्वसत्वानां मनुत्तर फ
लाप्नये॥ ८ ॥ प्रकाशयतु संबुद्ध भ
वान्शास्ता जगद्गुरो॥ महासमयतत्व
ज्ञ इन्द्रियाशयवित्परः॥ ९ ॥

भगवान्ज्ञानकायस्य महोष्णीषस्य गी
ष्पतेः॥मञ्जुश्रीज्ञानसत्वस्य ज्ञानमू
र्त्तेःस्वयंभुवः॥ १० ॥गंभीरार्थामुदा
रार्थां महार्थामसमां शिवां॥आदिमध्या
न्तकल्याणीं नामसंगीतिमुत्तमां॥ ११
॥यातितैर्भाषिताबुद्धै भाषिष्यन्ति
ह्यनागतैः॥प्रत्युत्पन्नैश्च संबुद्धै र्यांभा
षन्ते पुनः पुनः॥ १२ ॥मायाजालम
हातंत्रे याचास्मिन्संप्रगीयते॥महाव
ज्रधरै हृष्टै रमितै र्मंत्रधारिभिः॥ १३
॥अहंचैनां धारयिष्यामि निर्याणांच दृ
ढाशयः॥यथाभवाम्यहंनाथ सर्वसं
बुद्धगुह्यधृक॥ १४ ॥प्रकाशयिष्ये

सत्वानां यथाशयविशेषतः ॥अशेष
क्लेशनाशाय अशेषाज्ञानहानये ॥
१५ ॥एवमध्येष्य गुह्येन्द्रो वज्रपाणि
स्तथागतं ॥कृतांजलिःपुटोभूत्वा प्र
ह्वकायस्थितोग्रतः ॥ १६ ॥अध्येष
णाज्ञानगाथाषोडशः ॥ ॥अथ
शाक्यमुनिर्भगवान् सम्बुद्धो द्विपदोत्तम
ः ॥निर्णमय्यायतां स्फीतां स्वजिह्वां स्व
मुखाच्छुभां ॥ १ ॥स्मितसन्दर्शलो
कानां मपायत्रयशोधनं ॥त्रैलोकेभा
सकरणं चतुर्मारिसासनं ॥ २ ॥
त्रैलोकमापूरयित्वा ब्रह्ममधुरयागि
रा ॥प्रत्यभाषत गुह्येन्द्रं वज्रपाणिं म

हावलं॥ ३ ॥साधुवज्रधर श्रीमान् सा
धुतेवज्रपाणाय॥यत्त्वंजगद्धितार्थाय
महाकरुणयान्वितः॥ ४ ॥महार्थांना
मसंगीतिं पवित्रामघनाशिनीं॥मञ्जु
श्रीज्ञानकायस्य मत्तश्रोतुं समुद्यतः
॥ ५ ॥तत्साधुदेशयाम्येष अहंते
गुह्यकाधिप॥शृणुत्वमेकमनसा तत्
साधुभगवानिति॥ ६ ॥प्रतिवचनगा
थावर्॥ ॥अथशाक्यमुनिर्भग
वान् सकलमंत्रकुलं महत्॥मंत्रवि
द्याधरंकुलं व्यवलोक्यकुलेत्रयम्॥
७ ॥लोकालोकोत्तरं कुलं लोकालोक
कुलंमहत्॥महामुद्राकुलंचाग्रं महो

षाीषकुलंमहन्॥ २ ॥षट्कुलोव
लोकनगाथा द्वये॥ ॥इमांषराम
त्रराजानं संयुक्तामद्वयोदयां॥अनु
त्पादधर्मगाथा भाषन्तेस्म गिरांपते॥
१ ॥अआइईउऊ एऐ ओऔ अंअः
स्थितोहृदि॥ ज्ञानमूर्त्तिरहंबुद्धो बु
द्धानांत्र्यध्ववर्त्तिनां॥ २ ॥ॐ वज्रती
क्ष्णदुःखछेद प्रज्ञाज्ञानमूर्त्तये ज्ञान
काय वागीश्वर अलपचनायतेनमः
॥ ३ ॥मायाजालाभिसम्बोधिक्रमरि
गाथास्तिसृः॥ ४ ॥तद्यथा भगवा
न्बुद्धः सम्बुद्धोकार संभवः॥अकारःस
र्ववर्णाग्र्यो महार्थः परमाक्षरः॥ १ ॥

महाप्राणोह्यनुत्पादो वागुदाहारवर्जितः
॥सर्वाभिलाप्यहेत्वग्र्यः सर्ववाक्यप्रभास्व
रः॥ २ ॥महामहो महारागः सर्वसत्व
रतिंकरः॥महामहो महाद्वेष सर्वक्लेशम
हारिपुः॥ ३ ॥महामहो महामोहो मू
ढधीमोहसूदनः॥महामहो महाक्रोधो
महाक्रोधरिपुर्महान्॥ ४ ॥महाम
हो महालोभः सर्वलोभनिसूदनः॥महा
कामो महासौख्यो महामोदो महारतिः
॥ ५ ॥महारूपो महाकायो महावर्णो
महावपुः॥महानामामहोदारो महावि
पुलमण्डलः॥ ६ ॥महाप्रज्ञायुध
धरो महाक्लेशांकुशाग्रणीः॥महाय

शा महाकीर्त्ति र्महाज्योति र्महाद्युतिः॥
७ ॥ महामायाधरो विद्वान् महामाया
र्थसाधकः ॥ महामायारतिरतो महामा
येन्द्रजालिकः॥ ८ ॥ महादानपतिः श्रे
ष्ठो महाशीलधरोग्रणी ॥ महाक्षान्तिध
रो धीरो महावीर्यपराक्रमः॥ ९ ॥ महा
ध्यानसमाधिस्थो महाप्रज्ञाशरीरधृक॥
महाबलो महोपायः प्रणिधिर्ज्ञानसागरः
॥ १०॥ महामैत्रीमयोमेयो महाकारुणि
कोऽग्रधृक॥ महाप्रज्ञामहाधीमान् म
होपायो महाकृतिः॥ ११ ॥ महार्द्धिब
लोपेतो महावेगो महाजवः ॥ महर्द्धि
को महेशाख्यो महाबलपराक्रमः॥ १२॥

महाभवाद्रिसंभेत्ता. महावज्रधरोघनः॥
महाक्रूरोमहारौद्रो. महाभयभयंकरः॥
१३ ॥महाविद्योत्तमोनाथो. महामंत्रोत्त
मोगुरुः॥ महायाननयारूढो. महायान
नयोत्तमः॥ १४ ॥ वज्रधातुमहामण्डल
गाथाचतुर्द्दशः॥ ॥ महावैरोचनोबु
द्धो. महामौनिर्महामुनिः॥ महामंत्रन
यारूढो. महामंत्रनयात्मकः॥ १ ॥दश
पारमिताप्राप्तो. दशपारमिताश्रयः॥ द
शपारमिताशुद्धि. दशपारमितानयः॥
२ ॥ दशभूमीश्वरोनाथो. दशभूमिप्र
तिष्ठितः॥ दशज्ञानविशुद्धात्मा. दशज्ञा
नविशुद्धधृक्॥ ३॥ दशाकारो दशार्थो

र्थी. मुनीन्द्रो दशवलोविभुः ।। अशेष
विश्वार्थकरो. दशाकारोवशीमहान् ।।
४ ।। अनादिनिष्प्रपञ्चात्मा शुद्धात्मा
तथतात्मकः ।। भूतवादी यथावादी. तथा
कारी अनन्यवाक् ।। ५ ।। अद्वयोऽद्वय
वादीच. भूतकोटिव्यवस्थितः ।। नैरात्म्य
सिंहनिर्नाद. कुतीर्थमृगभीकरः ।। ६ ।।
सर्वत्रगोऽमोघगति. स्तथागतो मनोज
वः ।। जिनोजितारिर्विजयी. चक्रवर्त्ति
र्महावलः ।। ७ ।। गणमुख्यो गणाचार्यो
गणेशोगणपतिर्वशी ।। महानुभावो
धौरेयो. नन्यनेयो महानयः ।। ८ ।।
वागीशो वागपतिर्वाग्मी. वाचस्पति

रत्नगीः ॥ सत्यवाक् सत्यवादीच
चतुः सत्योपदेशकः ॥ ९ ॥ अवै
वर्त्तिको ह्यनागामि खड्गप्रत्येकनाय
कः ॥ नानानिर्याणनिर्यातो महाभू
तैककारणः ॥ १० ॥ अर्हन् क्षीण
स्रवोभिक्षुर्वीतरागोजितेन्द्रियः ॥ क्षेम
प्राप्तो ऽभयप्राप्तः शीतिभूतो ह्यनावि
लः ॥ ११ ॥ विद्याचरणसम्पन्नः सुग
तोलोकवित्परः ॥ निर्ममो निरहङ्का
रः सत्यद्वयनयेस्थितः ॥ १२ ॥
संसार पारकोटिस्थ कृतकृत्यस्थलेस्थि
तः ॥ कैवल्य

ज्ञाननिस्फूर्तः प्रज्ञाशस्त्रो विदारणः ॥ १३
॥सद्धर्मो धर्मराड्भास्वान् लोकालोककरः
परः॥ धर्मेश्वरो धर्मराजा श्रेयोमार्गोपदेश
कः॥ १४ ॥सिद्धार्थ सिद्धसङ्कल्पः सर्वसं
ल्पवर्जितः॥ निर्विकल्पो क्षयो धातु धर्म्म
धातुःपरोव्ययः॥ १५ ॥पुण्यवान् पुण्य
सम्भारो ज्ञानंज्ञानाकरं महत्॥ ज्ञानवान्
सदसज्ज्ञानि संभारद्वयसंभृतः॥ १६ ॥
शाश्वतो विश्वराड्योगी ध्यानंध्येयोधियांप
तिः॥ प्रत्यात्मवेद्यो ह्यचलःपरमाद्य स्त्रि
कायधृक॥ १७ ॥पञ्चकायात्मको बुद्धः
पंचज्ञानात्मकोविभुः॥ पंचबुद्धात्मम
कुटःपञ्चचक्षुरसङ्गधृक॥ १८ ॥

जनकः सर्वबुद्धानां बुद्धपुत्रोवरोवरः॥ प्र
ज्ञाभवोद्भवोयोनि धर्मयोनिभवान्तकृत्॥
१९ ॥ घनैकसारोवज्रात्मा सद्योजातोजग
त्पतिः॥ गगणोद्भवः स्वयम्भूः प्रज्ञाज्ञाना
नलोमहान्॥ २० ॥ वैरोचनोमहादीप्ति
र्ज्ञानज्योतिर्विरोचनः॥ जगत्प्रदीपोज्ञाना
ल्को महातेजाः प्रभास्वरः॥ २१ ॥ विद्यारा
जोग्रमंत्रेशो मंत्रराजामहार्थकृत्॥ महो
ष्णीषोद्भुतोष्णीषो विश्वदर्शीवियत्पतिः
॥ २२ ॥ सर्वबुद्धात्मभावाग्रो जगदान
न्दलोचनः॥ विश्वरूपीविधाताच पूज्योमा
न्योमहामुनिः॥ २३ ॥ कुलत्रयधरोमंत्रि
महासमयमंत्रभृक॥ रत्नत्रयधरः श्रेष्ठ

स्त्रियानोत्तमदेशकः॥ २४ ॥अमोघ
पाशाविजयी वज्रपाशोमहाग्रहः॥वज्रां
कुशोमहापाशो वज्रभैरवभीकरः॥
२५ ॥सुविशुद्धधर्मधातुज्ञानगाथापं
चविंशतिः॥ ॥क्रोधएषएसुदेव
भीमःषस्तेत्रःषड्गुजोवली॥दंष्ट्राकरालकं
कालेहलाहलशतानननः॥ १ ॥यमान्तको
विघ्नराजोवज्रवेगोभयंकरः॥विघुष्टव
जोहद्वज्रो मायावज्रोमहोदरः॥ २ ॥
कुलिशेशोवज्रयोनी वज्रमण्डोनभोपमः
॥अचलैकजटाटोपो गजचर्मपटार्द्र
पः॥ ३ ॥हाहाकारोमहाघोरो हीहीका
रोभयानकः॥अट्टहासोमहाहासो वज्र

हासोमहारवः॥ ४ ॥वज्रसत्वोमहास
त्वो वज्रराजोमहासुखः॥वज्रचण्डोमहा
मोदो वज्रहूँकारहूँकृतिः॥ ५ ॥वज्रवा
णायुधधरो वज्रखड्गो निकृन्तनः॥विश्व
वज्रधरोवज्री एकवज्री रणाञ्जहः॥ ६ ॥
वज्रज्वालाकरालाक्षो वज्रज्वालाशिरो
रुहः॥वज्रावेशोमहापाशो शतनाक्षो वज्र
लोचनः॥ ७ ॥वज्रलोमाकुलंतनु वज्र
लोमैकविग्रहः॥वज्रकोटिनखालंभो
वज्रसारघनछविः॥ ८ ॥वज्रमाला
धरःश्रीमान् वज्राभरणाभूषितः॥हाहा
हहासोनिर्घोषो वज्रघोषः षडक्षरः॥
९ ॥मञ्जुघोषोमहानाद त्रैलोकैकर

बोमहान ॥ आकाशधातु पर्य्यन्तो घोषाघो
षवताम्वर: ॥ १० ॥ आदर्शज्ञानग
था ढ्य: ॥ ॥ तथताभूतनैरात्मा
भूतकोटिरनाक्षर: ॥ शून्यतावादिवृष
भो गंभीरोदारगर्जित: ॥ १ ॥ धर्मशंखो
महाशब्दो धर्मगण्डि महारण: ॥ अप्रति
ष्ठितनिर्वाणो दशदिग्धर्मदुन्दुभि: ॥
२ ॥ अरूपो रूपवानग्रो नानारूपो मनोम
य: ॥ सर्वरूपोवभास: श्री रशेषप्रतिबिं
बधृक ॥ ३ ॥ अप्रधृष्यो महेशाख्यो त्रै
धातुकमहेश्वर: ॥ समुच्छितार्य्यमार्गस्थो
धर्मकेतु महोदय: ॥ ४ ॥ त्रैलोक्यैककु
मारांग: स्थविरो वृद्ध प्रजापति: ॥ द्वात्रिं

शक्तक्षणधरः कान्तस्त्रैलोकसुन्दरः॥ ५
॥लोकज्ञानगुणाचार्य्यो लोकाचार्य्योविशा
रदः॥नाथस्त्राता त्रिलोकाप्तः शरणन्तानिरु
त्तरः॥ ६ ॥गगनाभोगसम्भोगः सर्वज्ञज्ञा
नसागरः॥अविद्याकोशसंभेत्ता भवपंज
रदारणः॥ ७ ॥समिताशेषसंक्लेशः संसा
रार्णवपारगः॥ज्ञानाभिषेकमुकुटः सम्य
क्सम्बुद्धभूषणः॥ ८ ॥त्रिदुःखदुःख
समनस्त्र्यन्तोनन्तस्त्रिमुक्तिगः॥सर्वावर
णनिर्मुक्त आकाशसमतांगतः॥ ९ ॥
सर्वक्लेशमलातीतस्त्र्यध्वनध्वगतिंगतः॥
सर्वसत्वमहानागो गुणशेखरशेखरः॥ १०
सर्वोपधिविनिर्मुक्तो व्योमवर्त्मनि सुस्थितः

॥महाचिन्तामणिधरः सर्वरत्नोत्तमोवि
भुः॥ ११ ॥महाकल्पतरुस्फीतो महा
भद्रघटोत्तमः॥सर्वसत्वार्थकृत्कर्त्ता हि
तैषिसत्ववत्सलः॥ १२ ॥शुभाशुभ
ज्ञकालज्ञःसमयज्ञःसमयिविभुः॥स
त्वेन्द्रियज्ञोवेलज्ञो विमुक्तित्रयकोवि
दः॥ १३ ॥गुणीगुणज्ञोधर्मज्ञो प्रसस्तो
मंगलोदयः॥सर्वमङ्गलमाङ्गल्यः कीर्त्ति
लक्ष्मीर्यशःशुभः॥ १४ ॥महोत्सवो
महाश्वासो महानन्दोमहारतिः॥सत्कारः
सत्कृतिर्भूतिःप्रामोद्यःश्रीर्यशस्पतिः
॥ १५ ॥वरण्योवरदःश्रेष्ठःशरण्यो
शरणोत्तमः॥महाभयारिप्रवरो निःशेष

भयनाशनः॥ १६ ॥शिखिशिखिशिउ
जटिलो-रुटिमौराडुकिरीटमान्॥पंचा
ननः पंचशीर्षि पंचचीरकुशोधरः॥
१७॥महाव्रतधरो मौनि ब्रह्मचारि व्रतो
नमः॥महातपा स्तपो निष्ठः स्नातकोगो
तमोग स्ति॥ १८ ॥ब्रह्मविद्ब्रह्मणो
ब्रह्म ब्रह्मनिर्वाणमाप्तवान्॥मुक्तिमो
क्षोविमोक्षांगो· विमुक्तिज्ञानो वा शिवः
॥ १९ ॥निर्वाणा निर्वृ निशान्तिः श्रेयो
निर्याणमन्तकः॥सुखदुःखान्तकृन्नि
ष्ठा वैराग्यमुपधिस्मयः॥ २० ॥अज
योऽनुपमोव्यक्तो निराभासो निरञ्जनः
॥निस्कलः सर्वगो व्यापी पृथ्वीबीजम

नाश्रवः॥ २१ ॥असङ्गोविसङ्गोविमलो
वान्तदोषोनिरामयः॥सुप्रबुद्धोविबुद्धा
त्मा सर्वज्ञःसर्ववित्परः॥ २२ ॥
विज्ञानधर्मतातीतो ज्ञानमद्वयरूपधृक
निर्विकल्पोनिराभोग स्त्र्यध्वसंबुद्धका
र्य्यकृत॥ २३ ॥अनादिनिधनोबुद्धो
आदिबुद्धोनिरंन्वयः॥ज्ञानैकचक्षुरमलो
ज्ञानमूर्त्तिस्तथागतः॥ २४ ॥वागीश्व
रोमहावादी वादिराड्वादिपुङ्गवः॥वर
नाम्बरं श्रेष्ठो वादिसिंहोपराजितः॥
२५ ॥समन्तदर्शीप्रामोद्य स्तेजोमाली
सुदर्शनः॥श्रीवत्सःसुप्रभोदीप्ति र्भाभा
सुरकरद्युतिः॥ २६ ॥महाभिषग्वर

:श्रेष्ठः शल्यहर्त्ता निकृन्तरः ॥ अशेषभैष
ज्यतरुः क्लेशव्याधिमहारिपुः ॥ २७ ॥
त्रैलोकेतिलकः कान्तः श्रीमान्नक्षत्रम
ण्डलः ॥ दशदिग्व्योमपर्य्यन्तो धर्मध्वज
महोछ्रयः ॥ २८ ॥ जगच्छत्रैकवेपु
ल्यो मैत्रीकरुणामण्डलः ॥ पद्मनृत्येश्वर
:श्रीमान् रत्नछत्रो महाविभुः ॥ २९ ॥
सर्वबुद्धमहाराजा सर्वबुद्धात्मभावधृक्
॥ सर्वबुद्धमहायोगः सर्वबुद्धैकशासनः
॥ ३० ॥ वज्ररत्नाभिषेकः श्रीः सर्वरत्ना
धिपेश्वरः ॥ सर्वलोकेश्वरपतिः सर्ववज्र
धराधिपः ॥ ३१ ॥ सर्वबुद्धमहाचित्तः
सर्वबुद्धमनोगतिः ॥ सर्वबुद्धमहाकाय

:सर्वबुद्धसरस्वती॥ ३२ ॥वज्रसूर्य्यो
महालोको वज्रेन्दुविमलप्रभः॥विरागा
दि महारागो विश्ववर्णोज्वलः प्रभः॥
३३ ॥सम्बुद्धो वज्रपर्य्यङ्को बुद्धसंगीति
धर्मधृक॥बुद्धपद्मोधरः श्रीमान्सर्वज्ञज्ञा
नकोशधृक॥ ३४ ॥विश्वमायाधरो रा
जा बुद्धविद्याधरो महान्॥वज्रतीक्ष्णो म
हाखड्गो विशुद्धपरमाक्षरः॥ ३५ ॥दुः
खच्छेदो महायानो वज्रधर्मो महायुधः॥
जिनजिग् वज्रगांभीर्य्यो वज्रबुद्धिर्यथार्थ
विन॥ ३६ ॥सर्वपारमितापूरि सर्वभू
मिविभूषणः॥विशुद्धधर्मनैरात्म्य स
म्यग्ज्ञानेन्दुसत्प्रभः॥ ३७ ॥मायाजा

लमहायोगः सर्वतंत्राधिपःपरः॥अशेष
वज्रपर्य्यङ्को निःशेषज्ञानकायधृक्॥ ३८
॥समन्तभद्रः सुमतिः क्षितिगर्भो जगत्
पतिः॥सर्वबुद्धमहागर्भो विश्वनिर्माण
चक्रधृक्॥ ३९ ॥सर्वभावस्वभावाग्र
सर्वभावस्वभावधृक्॥अनुत्पादधर्मवि
श्वार्थ सर्वधर्मस्वभावधृक्॥ ४० ॥एक
क्षणमहाप्राज्ञः सर्वधर्मावबोधकृत्॥सर्व
धर्माभिसमयो भूतान्तमुनिरग्रधीः॥
४१ ॥स्तिमितसुप्रसन्नात्मा सम्यक्संबुद्ध
बोधिधृक्॥प्रत्यक्षः सर्वबुद्धानां ज्ञानार्चि
:सुप्रभास्वरः॥ ४२ ॥प्रत्यवेक्षणाज्ञान
गाथाश्चाचत्वारिंशत्॥ ॥इष्टार्थः

साधकः परः सर्वोपायविशोधकः॥सर्वस
त्त्वोत्तमोनाथः सर्वसत्त्वप्रमोचकः॥ १
॥क्लेशसंग्रामशूरैक अज्ञानरिपुदर्पहा
॥धीः शृंगारधरः श्रीमान् वीरविभत्सरूप
धृक॥ २ ॥बाहुदण्डशताक्षेपः पदनि
क्षेपनर्त्तनः॥श्रीमच्छतभुजाभोगो ग
गनाभोगनर्त्तनः॥ ३ ॥एकपादतला
क्रान्तो महिमण्डतलेस्थितः॥ब्रह्माण्ड
शिखराक्रान्तः पादांगुष्ठनखेस्थितः॥
४ ॥एकार्थोद्वयधर्मार्थः परमार्थोविने
श्वरः॥नानाविज्ञप्तिरूपार्थश्चित्तविज्ञा
नसन्ततिः॥ ५ ॥अशेषभावार्थरति
शून्यतारतिरग्रधीः॥भवरागाद्यतीतश्च

भवत्रयमहारतिः॥ ६ ॥शुद्धःशुभ्राभ्रभ
वः शारच्चन्द्रार्कसुप्रभः॥बालार्कमण्डल
छायोमहारागनखप्रभः॥ ७ ॥इन्द्रनी
लाग्रसच्चीरो महानीलकचाग्रधृक॥म
हामणिमयूखश्रीः बुद्धनिर्माणभूषणः
॥ ८ ॥लोकधातुशतानार्कंपी· ऋद्धिपाद
पराक्रमः॥महास्मृतिधरस्तत्वो चतुस्मृ
तिसमाधिराट्॥ ९ ॥बोध्यङ्गकुसुमामो
दस्तथागतगुणोदधिः॥अष्टांगमार्गन
यवित् सम्यक्सम्बुद्धमार्गवित्॥ १० ॥
सर्वसत्वोमहासंगो निःसंगोगगणोपमः॥
सर्वसत्वोमनोजानः सर्वसत्वमनोजवः॥
११ ॥सर्वसत्वेन्द्रियार्थज्ञः सर्वसत्वमनो

हरः॥पंचस्कन्धार्थतत्वज्ञः पंचस्कन्धवि
शुद्धक॥ १२ ॥सर्वनिर्याणकोटिस्थः
सर्वनिर्याणकोविदः॥सर्वनिर्याणमार्गस्थ
सर्वनिर्याणदेशकः॥ १३ ॥द्वादशांगभ
वोद्धृतो द्वादशाकारशुद्धक॥चतुःसत्य
नयाकार अष्टज्ञानावबोधक॥ १४ ॥
द्वादशाकारसत्यार्थः षोडशाकारतत्ववि
त्॥विंशत्याकारसंबोधि विबुद्धसर्ववित्परः
॥ १५ ॥अमेयबुद्धनिर्माणं कायकोटि
विभावकः॥सर्वक्षणाभिसमयः सर्वचि
त्तक्षणार्थवित्॥ १६ ॥नानायाननयोपा
यो जगदर्थविभावकः॥यानत्रितयनि
र्यात एकयानफलेस्थितः॥ १७ ॥

शाक्षानुविशुद्धात्मा कर्मधातुक्षयंकरः॥ओघो
दधिसमुत्तीर्णो योगकान्तारन्निःसृतः॥ १८
॥क्लेशोपक्लेशसंक्लेशःसुप्रहीनसवास
नः॥प्रज्ञोपायमहाकरुणा अमोघजगदर्थ
कृत॥ १९ ॥सर्वसंज्ञाप्रहीनार्थो विज्ञाना
र्थोनिरोधकृक॥सर्वसत्वामनोविषयःसर्व
सत्वमनोगतिः॥ २० ॥सर्वसत्वमनोन्त
स्थ स्वचित्तसमतागतः॥सर्वसत्वमनोह्ला
दि सर्वसत्वमनोगतिः॥ २१ ॥सिद्धान्तः
सिद्धसङ्कल्पः सर्वभ्रान्तिविवर्जितः॥निः
संदिग्धमतिस्त्र्यर्थ सर्वार्थस्त्रिगुणात्मकः
॥ २२ ॥पञ्चस्कन्धार्थस्त्रिकालःसर्वक्ष
णाविभावकः॥एकक्षणाभिसम्बुद्धःस

र्वबुद्धस्वभावधृक्॥ २३ ॥अनंगकायो
कायाग्र्य कायकोटिविभावकः॥अशेष
रूपसंदर्शी रत्नकेतुर्महामणिः॥ २४ ॥
समन्ताज्ञानगाथाचतुर्विंशतिः॥ ॥
सर्वसंबुद्धबोधव्यो बुद्धबोधिरनुत्तरः॥अ
नक्षरो मंत्रयोनि र्महामंत्रकुलत्रयः॥
१ ॥सर्वमंत्रार्थजनको महाविन्दुरनक्ष
रः॥पंचाक्षरो महाशून्यो विन्दुशून्यः षड
क्षरः॥ २ ॥सर्वाकारो निराकारः षोड
शार्द्धार्द्धविन्दुधृक्॥अकलः कलनातीत
श्चतुर्थध्यानकोटिधृक्॥ ३ ॥सर्वध्यान
कलाभिज्ञः समाधिकुलगोत्रवित्॥स
माधिकायकायाग्र्य सर्वसंभोगकायरा

क॥ ४ ॥निर्माणकायकायाग्रो बुद्धनि
र्माणवंशधृक॥दशदिग्विश्वनिर्माणो
यथार्थजगदर्थकृत॥ ५ ॥देवातिदे
वोदेवेन्द्रःसुरेन्द्रोदानवाधिपः॥अमरे
न्द्रोसुरगुरुःप्रमथःप्रमथेश्वरः॥ ६ ॥
उत्तीर्णभवकान्तार एकशास्ताजगद्गुरुः
॥प्रख्यातदशदिग्लोके धर्मदानपतिर्म
हान॥ ७ ॥मैत्रीसन्नाहःसन्नद्धःक
रुणावर्मवर्म्मितः॥प्रज्ञाखड्गधनुर्वाण
क्लेशाज्ञानरणंजहः॥ ८ ॥मारारिर्मार
जिद्वीरश्चतुर्मारभयान्तकृत॥सर्वमार
चमूजेता संबुद्धो लोकनायकः॥ ९ ॥
वन्द्यःपूज्योभिवाद्यश्च माननीयश्चनि

न्यस:॥अर्च्चनीयोनमोनान्यो नमस्तेपरमो
गुरु:॥ १० ॥त्रैलोकैकक्कमगति व्योमा
पर्य्यन्तविक्कम:॥त्रैविद्य:श्रोत्रिय पूत:
षडभिज्ञ:षडनुस्मृति:॥ ११ ॥बोधिस
त्वोमहासत्वोलोकातीतोमहर्द्धिक:॥प्रज्ञा
पारमितानिष्ठ:प्रज्ञानत्वत्वमागत:॥
१२ ॥आत्मविनपरविन्सर्वसर्वीयोह्यग्र
पुंगव:॥सर्वोपमामतिक्रान्तो ज्ञेयोज्ञानाधि
प:पर:॥ १३ ॥धर्मदानपति:श्रेष्ठश्चतु
र्मुद्रार्थदेशक:॥पर्य्युपास्तेनमोजगतां नि
र्य्याणमार्गयायिनां॥ १४ ॥परमार्थविशु
द्धश्रीत्रैलोक्यसुभगोमहान॥सर्वसंपत्क
र:श्रीमान मंजुश्रीश्रीमतांवर:॥ १५ ॥

शून्यानुस्थानज्ञानगाथाः पंचदशाः॥ ॥
नमस्ते वरद वज्राग्र भूतकोटि नमोस्तुते॥ न
मस्ते शून्यतागर्भ बुद्धबोधिं नमोस्तुते॥ १
॥बुद्धराग नमस्ते तुं बुद्धकाय नमो नमः॥
बुद्धप्रीति नमोस्तुभ्यं बुद्धमोद नमो नमः॥
२ ॥बुद्धस्मिति नमस्तुभ्यं बुद्धहास नमो
नमः॥बुद्धवाच नमस्ते तुं बुद्धभाव नमो न
मः॥ ३ ॥अभवोभव नमस्ते तुं नमस्ते बु
द्धसंभवं॥गगनोद्भव नमस्तुभ्यं नमस्ते ज्ञान
संभवः॥ ४ ॥मायाजाल नमस्तुभ्यं नम
स्ते बुद्धनाटकः॥ नमस्ते सर्वसत्वेभ्यो ज्ञा
नकाय नमोस्तुते॥ ५ ॥इति पंचतथा
गतस्तुतिगाथा पंच॥ ॥ॐ सर्वधर्मा

भावास्वभावविशुद्धवज्र अआः अं अः प्र
कृतिपरिशुद्धाः सर्वधर्मा यदुत सर्वतथा
गतज्ञानकायमंजुश्रीः परिशुद्धितामुपा
दायेति अआः सर्वतथागतहृदय · हर हर
ॐ हूं ह्रीः भगवान् ज्ञानमूर्त्ति वागीश्वर महा
वाच सर्वधर्मगगनामल सुपरिशुद्ध धर्मधा
तुज्ञानगर्भ आः॥ ॥मंत्रविन्यासः॥ ॥
अथ वज्रधरः श्रीमान् हृष्टतुष्टः कृतांज
लिः॥ प्रणम्य नाथं संबुद्धं भगवन्तं तथा
गतं॥ १ ॥अन्यैश्च बहुविधैर्नाथैर्गुह्य
राजैर्वज्रपाणिभिः॥ संसार्द्धं क्रोधराजान्यैः
[illegible]रिदं वच॥ २ ॥अनुमोदाम
हे नाथ साधु साधु सुभाषितनः॥ कृतोस्माकं

महानाथ सम्यक्सम्बुद्धप्रापकः॥ ३ ॥
जगतश्चास्यनाथस्य विमुक्तिफलकांक्षि
णः॥श्रेयोमार्गोविशुद्धोयं मायाजाल
नयोदितः॥ ४ ॥गंभीरोदारवैपुल्यो म
हार्थाज्जगदर्थकृत॥बुद्धानांविषयोह्येष
सम्यक्सम्बुद्धभाषितेः॥ ५ ॥इतिउप
संहारगाथापंचमः॥ ॥आर्य्यमा
याजालषोडशसाहस्त्रिका महायोगतंत्र
नयानिसमाधिजालपतलाभगवतस्त
थागतःशाक्यमुनिर्भाषितर्भगवतोमंजु
श्रीज्ञानसत्वस्यपरमार्थनामसंगीतिप
रिसमाप्तः॥ ॥शुभं॥ ॥
स्तुतमपि॥
स्तुनमपिसुरसंघैः सिद्धगन्धर्वयक्षैर

दिविभुविभुविचित्रैः स्तोत्रवाग्भिर्यती
शैः ॥ अहमपि तन्नशक्तिं नैमिसंवुद्धमा
र्गं नभसि गरुडयानि किन्नयान्ति द्विरे
फाः ॥ १ ॥ क्षपितदुरितपक्षः क्षीणनिः
शेषदोषो ज्वलितकनकवर्णः स्फुरदप
मायतनाक्षः ॥ सुहृत्त्विरपरिवेशः सुप्रभाम
न्दकूर्मी दशावलनवनिन्द्यं सुप्रभातं प्र
भातं ॥ २ ॥ मदनबलविजेतुः कापथ
च्छेदकर्तुः त्रिभुवनहितकर्तुः स्त्रीलताज
र्त्तुः समसुखफलदातुः भेत्तुरज्ञानद्वे
षं दशावल ॥ ३ ॥ असुरसुरनरा
णां योग्यजन्माणदेवः सकलभुवननाथो
जितश्लोकशत्रुः ॥ स्वपितिमनुजधा

ना भजयोनिस्स्वयंभु॰ दशावल×॥ ४
॥उदयगिरितटस्थो विद्रुमच्छेदनाभ
स्तिमिरनिकरहन्ता भ्रश्रुरेकप्रजानां
॥रविरपि मदलोलः सर्वथा सोपि भुग्नो
॰दशावल×॥ ५ ॥द्विरददशनपा
ण्डुः शीतरश्मिः शशांको ज्वलितइव स्ज
न्यां सर्वचूडामणिर्यः॥अविगतमदरा
गः सर्वथा सोपि भुग्नो॰ दशावल×॥
६ ॥प्रवरभुजच्चनक्षः षोडशार्द्धार्द्धवक्त्रो
जपनियमविधिज्ञः सामवेदप्रवक्ताः
॥अमलकमलयोनिः सोपि ब्रह्मापि भु
ग्नो॰ दशावल×॥ ७ ॥हिमगिरिश्चि
खरांभः सर्पयज्ञोपवीति स्त्रिपुरदहन

॥ भनिशानिशिपुत्र:

दक्षो व्याघ्रचर्मोत्तरीयः सहगिरिवरपु

त्र्या सोपि भुग्नाहि भूलि॰दशावल×॥

८ ॥ज्वलितकलिशापोशाः ईर्ज्येयो दान

वानां सुरपतिरपि शच्याविभ्रमोमदचि

त्तः कामपंके निमग्नो॰दशावल× ॥ ९॥

कुवलयदलनील: पुण्डलीकायताक्ष:

सुररिपुवलहन्तो विश्वकीर्तिस्वरूपी॥

हरिरपि चिरभ्रान्तोगर्भवासैरमुक्तो॰द

शावल×॥ १० ॥ज्वलितजटकलापो

[illegible]नाम्नारुणाक्षः प्रभुपतिरमिकाले

[illegible]गभंगैकदक्ष: समरसज्वलितांगः

[illegible]पिभ्रान्तोनाशो॰दशावल× ॥ ११ ॥

[illegible]मताक्रिकुसुरांभो मद्यपानारुणाक्ष

दृढकठिनभुजांगो लांगलीशक्तिहस्तो
बलदृहसधिनोसौ रेवतीकण्ठलग्नो॰
दशावल×॥ १२ ॥गजमुखदशनैकः
सर्वथाविघ्नहन्ता॰विगलितमदवारिः
षट्पदोत्कीर्णगण्डः॥गणपतिरपिभु
भ्रो वारुणीपानमत्तो॰ दशावल×॥
१३ ॥अतसिकुसुमनील यस्यशक्तिक
राग्रे नवकमलवपुष्मां षण्मुखः क्रोंच
हन्ता त्रिनयननतयोसौ नित्यसुमोकु
मारो॰ दशावल×॥ १४ ॥अज्ञानव
सनहीना नित्यभोगानयुक्ता बहुवि
विधविधाता॰ प्रेतवद्दग्धदेहा उभय
गतिविहीनास्तेपिनग्नाः प्रबुद्धा॰द

द्याबल × ॥ १५ ॥ अथयदिह महान्तो
चनसंभोगवाङ्गिराद्याः ऋतुपुलहवशि
ष्ठ व्यासवाल्मीकिगर्गाः॥ परमुपेति
विलासे मोहिनास्तेपि सुप्ता॰ दयाबल
× ॥ १६ ॥ यमवरुणकुवेर यक्षदे
त्योरगेन्द्रा दिविभुविगगनेवा लोक
पालास्तथान्ये॥ युवतिमदकटाक्षैर्वी
क्षिनास्तेपि सुप्ता॰ दयाबल × ॥ १७ ॥
भवजलनिधिमग्नो मोहजालावृताङ्गा
मुनिकपिलकणाद्याभ्रामिना मूढचि
त्ता: सम सुखपरिहीनाबालिशास्तेपि
सुप्ता॰ दयाबल × ॥ १८ ॥ अज्ञान
निद्रजनीतमसि प्रसुप्ता॰ स्तृष्णावि

शालशायने विषयोपधाने · कालेशुभा
शुभफलं परिकीर्त्यमानं जागर्त्तियः
सततमेव नमोस्तु तस्मै ॥ १९ ॥ तीर्थे
षु गोकुलशतानि पिबन्ति तोयं तृप्तिं ब्रज
न्ति न च तत्क्षयमभ्युपैति ॥ ततवस्तुने
कविशतैरपि संस्तुतस्य नक्षीयते गुणा
निधिर्गुणसागरस्य ॥ २० ॥ सुप्रभा
तं तवैकस्य ज्ञानोन्मीलितचक्षुषः ॥
अज्ञानतिमिरान्धानां नित्यमस्तु स्थि
तो रविः ॥ २१ ॥ पुनः प्रभातं पुनरु
त्थितो रविः पुनः शशाङ्कः पुनरेव
शार्वरी ॥ मनुजेराजन्म नथैव हेमने
गतागतिं मूढकथं न बुध्यते ॥ २२ ॥

सुप्रभातंसुनक्षत्रं श्रियाप्रत्यभिनन्दितं
बुद्धंधर्मञ्चसंघंच प्रणमामिदिनेदिने
॥ २३ ॥ स्तुत्वालोकगुरुं महामुनिव
रं सद्धर्मप्रणयध्वजं ॥ निर्द्वन्द्वं हतराग
द्वेषतिमिरं शान्तेन्द्रियंनिस्पृहं ॥ यत्पु
ण्यंसमुपार्ज्जितंखलुमया तेनैवलोको
खिलं ॥ प्रत्यूषेस्तुतिहर्षितो दशबले श्र
द्धाम्परांविन्दताम् ॥ २४ ॥ इति श्रीस
र्वज्ञसम्बुद्धभट्टारकस्य हर्षदेवविरचि
तंदशबलस्तवस्तोत्रंसमाप्तं ॥ ॥
वन्देश्री ॥
नमः श्रीवज्रसत्त्वाय ॥ वन्दे श्रीवज्रस
त्त्वंभुवनवरगुरुं सर्व्वबुद्धंभवन्तं· नाना

रूपं जिनेन्द्रं तिमिरभयहरं निर्मितं मेरु
संस्थं ॥ धर्माधारं मुनीनां जिनगुणशुभ
दं मण्डलं वज्रधानो ॥ सर्वानन्दैकरूपं प
रमसुखमयं देहिनां मोक्षहेतुं ॥ १ ॥
अज्ञानगाढतिमिरार्णव मग्नसत्वान्
मोहान्धकार नमवारणचन्द्ररश्मिः ॥
ज्ञानंप्रकाशपरि पूरितवीर्य्यधानं श्री
वज्रसत्वमसमं शिरसानमामि ॥ २ ॥
यस्मिन्सुरासुरसुरेन्द्र नरेन्द्रवृन्दा स्तत
पादपद्म पतिताभ्रमराशिरोभिः ॥ तत्
सिद्धिसाधनपयोधिमहानिधानं श्री
लोकनाथचरणं शरणं प्रयामि ॥ ३
॥ बुद्धं त्रैलोकनाथं सुरवरनमितं पा

र संसारनीरं ॥ धीरं गांभीर्य्यवन्तं सकलगु
णनिधिं धर्मराजाभिषिक्तं ॥ तृष्णामोहा
न्धकारं कलिकलुषहरं कामलोभादिव
र्ज्जम ॥ नम्वन्दे शाक्यसिंहं प्रणमितष्ठि
र मा सर्वकालं नमामि ॥ ४ ॥ ह्रींकार
संभवनाथं करुणास्निग्धमानसं ॥ अमि
तपाज्ञानामानं लोकनाथं नमाम्यहं ॥ ५
॥ मामकी लोचनी पण्डनीतारां नमस्ते
जिनधातुके ॥ सर्व्वबुद्धालयं चैत्यं धर्मधा
तुं नमोस्तु ते ॥ ६ ॥ नमस्तारे तुरे वी
रे तुत्तारे भयनाशिने ॥ तुरे सर्वार्थ दे दे
दि स्वाहाकारं नमाम्यहं ॥ ७ ॥ इतिव
न्दना स्तोत्रं समाप्तं ॥ ॥ ॥

सिद्धिमुनि

नमो बुद्धाय॥ सिद्धिमुनिवर पादपंकज
श्रीधर्मधातु विचित्रकं॥ बोधिसत्त्वो महा
सत्त्वः स्वयम्भुचैत्यं नमाम्यहं॥ १ ॥
धर्मधातु ध्यानसंयुतं दुरितदुःखविना
शनं॥ शाक्यमुनिवर तत्र आगत स्वयं
भूचैत्यप्रकाशितं॥ २ ॥ तलियपुगंभे
दतलियनाम पद्मगिरि तत्रसंस्थितं॥
श्रृङ्गटक गोशृंगगिरि गोपुच्छगिरि
विश्रुतं॥ ३ ॥ विपुलविस्तीर्ण महाप्र
कार विमलनील सुरंजितं॥ नीलनिकु
ञ्जदलसुगन्धकल्हार दिव्यकुसुम सुशो
भितं॥ ४ ॥ शाकरप्रमाणासहस्वद

नो· रत्नमयश्रुनिरञ्जिनं २ हिरंण्यकेशरवि
भिमनालं स्वयंभुचैत्य निवासिनं ॥ ५
॥ मयलवप्रष कलुषनाशन. विशाल
शोभनसुन्दरं २ चतुरस्रुरु निनीलपीत
रक्तप्रभा संज्वलिनं ॥ ६ ॥ नानाकु
सुमवर्णशोभिन. फलान वृक्षशोभिनं
२ चूतचंपक नागकेशर· पक्षनालमने
हरं ॥ ७ ॥ नागगन्धर्वयक्षकिन्नर· गरु
ड मुनिभिक्षु वासिनं २ पुण्यभूमौ मोक्ष
कांक्षिन· विविधउपहार ढौकिनं ॥ ८ ॥
धर्मश्रीमित्र नत्रसेविन· मंजुदेवनमा
मनं २ द्वादशाक्षरबोधनार्थ· धर्मधातुवा
गीश्वरं ॥ ९ ॥ शान्तिकाररासाधना

र्थं·पंचपुरि निवासिनं२ महामारि अनावृ
ष्टी·दुर्भिक्ष घोरप्रशान्तिकं॥ १० ॥अ
ष्टनामानि वैनराग· मणिलिंग गोकर्णे
कं२च्चाहुगिरि वरकुंभतीर्थ·फणिनग
ध्वनिविक्रमं॥ ११ ॥पूर्वदिगंदिश
देवतीर्थ·हरहार समुद्भवं२ वागमतीवि
चित्रतालं·चिन्तामणिनदिभाजितं॥
१२ ॥केशाश्मश्रणि केशछेपन·के
शावती नदिसंगमं२ वृच्छाफलदं अ
संख्यदाता अष्टनाम प्रकीर्तितं॥ १३
॥अतुलवरप्रद पुण्यवागीश्वर तत्र
शैलनिछेदनं२ भक्तिनरजनअभिष्ट
फलदं· मोक्षसुखावतीं प्राप्नुयात॥ १४

ॐ

॥ ॐ नमो श्री स्वयंभु चैत्येभ्यो न्मजिगीन समा
यं॥ ॥ मध्येगत॥
नमो बुद्धाय॥ मध्येगत विजय श्री- वैरोच
न जिनवरं २ सिंहमासन स्थित श्वेतवर्ण
॥ ॐ ॥ नमोस्तु २ पंचजिन शरणं॥ १॥
पूर्वदिग्गत विजय श्री अक्षोभ्य जिनव
रं २ गजमासन स्थित नीलवर्ण॥ नमो
स्तु २॥ २ ॥दक्षिणदिग्गते विजयश्री
रत्नसंभव जिनवरं २ तुरंगमासन स्थि
त पीतवर्ण॥ नमोस्तु २॥ ३ ॥पश्चि
मदिग्गत विजय श्री- अमिताभ जिनव
रं २ मयूरमासन स्थित रक्तवर्ण॥ नमो
स्तु २॥ ४ ॥उत्तरदिग्गत विजय श्री

अमोघसिद्धिजिनवरं२ गरुडमासनस्थि
न श्यामवर्णं॥नमोस्तु२॥ ५ ॥हरिह
रब्रह्माशक्र·नागयक्षसुरासुरैः२ वज्र
विघ्नउपहारसुपुष्पारोहनं॥ नमोस्तु२॥
६ ॥इतिपंचतथागतस्तुतिसमाप्तं॥ ॥

स्निग्धनील॥

ॐनमःशाक्यसिंहाय॥स्निग्धनीलमृदु
कुंचितकेशाः सूर्यसुनिर्मलनाभिलला
टः॥युक्तिनुंगमृदुकायसुनाशो·रंगज्व
लाद्भुतनानरसिंहः॥ १ ॥अंजनवर्णसु
नीलसुकेशो·कांचनपत्रविभूषललला
टः॥ओषधिपाननभक्तसुकर्णो॰सुब
हितुल्यविनानरसिंहः॥ २ ॥आयत

सुनक्सुसंचितनाभो गोपसुखो अतिनील
सुनेत्रो भाकत्र अनु अतिनीलसुनेत्रो ०स्प
र्शहि सुरपितानरसिंहः॥ ३ ॥स्निग्धसु
गंभीर मंजुसुघोषो हिंगुलिवर्णसुरक्त
सुजिह्वा॥ विंशतिविंशतिश्वेतसुदन्ता०
स्पर्शहि×॥ ४ ॥वर्त्तसुवर्त्तसुसंचित
ग्रीवः सिंहहनुर्मृगराजशरीरः॥ कांचन
स्वछविउत्तमवर्ण०स्पर्शहि×॥ ५ ॥
गजतिनीलपथेसुविचित्रो स्नारगरा
पारमचितनरूपः॥ श्रावकमध्यगतः श्री
मुनीन्द्रः०स्पर्शहि×॥ ६ ॥चक्रमलं
कृतारक्सुपादो लक्षणमण्डितआय
तपाणिः॥ चामलचक्रविभूषितपा

रणी: ० स्वहि स्व॥ ७ ॥शाक्यकुमार व
र: सुकुमारे लक्षणाचितसुगुणपदधारी
र:॥लोकहितायगतोनरवीर: । ० स्वहि
स्व॥ ८ ॥अमानदीवर चन्द्रगजेन्द्रो
मारपराजयभीमसुवीर:॥सर्वगुणाक
र लोकविशुद्धो वन्दमिगौतम श्रीमुनि
पादौ॥ ९ ॥इतिश्री शाक्यमुनिभ
ट्टारकस्य यशोधराविरचिताराहुलसंबो
धनस्तोत्रं समाप्तं॥ ॥ ॥

विश्वविक्रम:

ॐ नम: श्री त्रिगुणात्मक श्रीमदार्य्यावलो
कितेश्वराय॥ ॥विश्वविक्रमनत्र
विनिर्ज्जित दक्षकारावर वरविराजित-

सन[illegible]पति मौलिलालित·पादपंक
जे ॥ [illegible]हस्तनलस्थ सरसिज मंजु
पौ[illegible]जानसरसिज · विविध मणि
[illegible]मण्डित · दुरितखण्डन हे ॥ १
॥ जटिलमौल्यमिताभधारण सकल
निजजन दुःखनाशण · विपुलकमल
निसाकरासन · भक्तिसासन हे ॥ चारुमु
खकृत कुटुहासन वज्रसंज्ञिक कृतनि
वासन · विघ्नचयभय कृतनिवासन ·
[illegible]लिनलासन हे ॥ २ ॥ पाशनिक्षिल
[illegible]कृशा[illegible]ग चापशोभित पाणिनल
[illegible]चरणकृत सुचर्च्चन · सुजन
[illegible]नन हे ॥ श्रीणकुसुमभारविमर्दनि शो

कनरूवर वामनन्पर· योगनिर्जित विविध
मुनिवर· भक्तसुखकरहे॥ ३ ॥वामद
क्षिराभृकुटिनाशिणी विविधरनिरसभा
क्कारिणि· संगांगसुधासुवारिणि· तरु
णिरूपसमानहे ॥नमनविमलसरोजसुन्द
रध्वनिविनिर्जित ललितमराडल कामिनी
जनमानहारक· विघ्नदारकहे॥ ४ ॥
विविधबुद्धिसुसिद्धिदायक मूढजनमन
बुद्धिदायक· सार्थललितविलोकितेश्व
र· महेन्द्रजनेश्वरहे॥ब्रह्मरुद्रहरीन्द्र
धनपतिरूपतर्जित सकल नरपति· हार
परिहृत नारकानति· विबुधसंमतहे॥
५ ॥गुरुसमेर्चनभावभावितचरणयु

गगनभुवनव्यापित · वैरीवननृपसमर
घातिन · तापव्यापितहे ॥ चन्द्रनौचिहृचि
निमितकारण सर्वजनवर स्थपनकारण
· त्रिनयभेदविचारधारण · त्रिगुणाचार
णहे ॥ ६ ॥ भुवनभृष्टिविनाशपालन
मुष्टितिशुनकृतविलापन · ब्रह्माविष्णु
महेशाभावन · कलिविघातनहे ॥ छिदश
दलननवयमखेलनजननसंहृनिजनित
हिलन · वज्रिसश्रुतिशक्तिविहरण · सिद्धि
दाननहे ॥ ७ ॥ चक्रखड्गसुभेदकारक
निमित्तंचन्द्रसुभासुवाहक गगनमण्डल
नगरनायक पंचसायकहे ॥ पवनगमन
निरोधसाधककठिननिखिलनिरक्तबा
धक · स्वननरूपस्वजीवहारक · विघ्न

दारके॥ ८ ॥योगपरिचितिविजित
रतिपतिभोगसंगति भोगसंगति युवति
कृतनति·ज्ञानदायन सुहृदयनितनतिदीन
जनगतिहे ॥मुकुटसुललितमौलिमरत्न
लगरत्नमणिड़त विमलकुण्डल·विपुल
भुजवल विजितभनल·कर्मनिर्मल हे
॥ ९ ॥कवीन्द्रमल्ल प्रतापनरपति स
कलगुणाश्चय भुक्तसम्मति·रचितमत्स्य
महीन्द्र वर्णन·वृद्धिवर्द्धनहे ॥वहतिहि
नमति चित्तचितिनितसुचितसुकृतसम्भृ
हजृंभित·मतिननतिसतभावसूचित·
ममेरसंमितहे॥ १० ॥इतिश्रीसमस्त
शास्त्रसंगीतासकलविद्यापारंगतम
हाराजाधिराजविदग्धचूडामणि श्री ३

[illegible] कवीन्द्र [illegible] प्रतापमल्लदेव
[illegible] श्री ३ श्रीमदाचार्य
[illegible] स्तोत्रं समाप्तं ॥ ० ॥
ॐ [illegible] दिदेव ॥
[illegible] ॥ कुब्जादिदेवनववन्दि
[illegible] हंसासनी त्रिनयनी शुभमं
[illegible] ॥ कस्तूरिकुंकुमसुवासितदेह
[illegible] नेसारदा सकलसिद्धिदां नमामि
॥ १ ॥ हेमालये विमलसंस्थित वाल
[illegible] नेपालमण्डलवलोक्तमनोहराणी
[illegible] ॥ श्रीकाश्मीरे त्रिभुवनेश्वर शक्तिरूपी
[illegible] ॥ २ ॥ वेदान्तनादगुणा
[illegible] प्रकाशितेन · वाग्देवते त्रिभुवनेश्व
[illegible] रूपी ॥ सा वेणुवंशाकरपुस्तक

अक्षमाला॰ नेसारदा× ॥ ३ ॥ कृपा
निरभ्राशशिपूर्णकलास्वरूपी· वारुणी
मनोहरसुलालितपीयुषीश्च ॥ नीलोत
पलानयनविन्दुरनसञ्ज्योती॰ नेसार
दा× ॥ ४ ॥ संपूर्णकोषनव अक्षय
:सारदाया: पातालमर्त्यत्रिदशालयेपू
जितानि ॥ मंत्रादिवाक्यज्ञानजीवितस
र्वयंत्र॰ नेसारदा× ॥ ५ ॥ संसारसा
रवचनानवसुप्रसन्ना· देवानरा अपस
राधिपकिन्नराणां ॥ वांछामनोरथनवा
र्थनसिद्धियन्ती॰ नेसारदा× ॥ ६ ॥
कर्पूरपूगपरिपूरितनाम्बुलादि·पुष्पैः
सुभाअगुरुचन्दनचर्चितानि ॥ नित्यंप्र
राम्यशिरसा नवमेकभावं॰ नेसारदा×

॥ ७ ॥ षट्चक्रपद्मनवभेदिनमंत्रराज्यं
[illegible] ॥ भक्तजनासुगतिस्त्वमेव ॥ त्वंज्ञान
[illegible] दुःखविनाशकारि ० नेमारता ४ ॥
८ ॥ इति [illegible] स्तोत्रंसमाप्तं ॥ ॥

कांपोनलस्तुति ॥

[illegible] कनाथाय ॥ कांपोनलचलभूमि·
[illegible] यनेपालं श्वन्त्सरद्वादशा अनावृष्टि
मोचनार्थ ॥ १ ॥ आराधिनाश्रीवृगम
[illegible] केष्वारं श्रुरुवभुदन्तनृपश्री· नरे
[illegible] देवः ॥ २ ॥ रथंचक्रमयाजात्रा ग
॥ [illegible] नाप्रीश्पूजितं सरोजपाणिंत्रै
[illegible] नाथं ॥ ३ ॥ येनभगति येनमोक्ष
[illegible] पादपंकजयुगे· नैमिख्रारसा ॥
४ ॥ इति [illegible] लोकनाथस्तवसमाप्तः ॥ ॥

नजातो

नमोबुद्धाय॥ नजातोनमृतंचैव नरूपोना
पिरूपवान॥ नसंसारे ननिर्वाणो नकारंते
नमस्त्वते॥ १ ॥ मोहध्वंसकरोनित्यं मो
क्षसौख्यं प्रदायकं॥ मोहनंसर्वमाराणां
मोकारंतेनमस्त्वते॥ २ ॥ बुद्धानामुदितं
ध्यानं बुद्धानांजननेमरकं॥ बुद्धनिर्क्लेशसंबु
द्ध बुकारंतेनमस्त्वते॥ ३ ॥ धारिनोबो
धिसत्वैः सद्धर्मभानुगतिसदा॥ धर्मेशाणं
परमोधर्म धाकारंतेनमस्त्वते॥ ४ ॥
यथास्थितिं तथायत्त यथानत्व तथाफ
लं॥ यथावादी तथाकारि यकारंतेनम
स्त्वते॥ ५ ॥ पंचाक्षरमिदं पुण्यं प्रातिपा

पंचिमाङ्खानं॥सकृदुच्चार मात्रेण सर्वपापं
परिक्षयः॥ ९ ॥इतिपंचाक्षरस्तुतिस
माप्तं॥ ॥ अहृणावदन॥ ॥
नमोलोकनाथाय॥ अहृणावदनदेह·स
रोजिनसंभव२ दहिनवादवाम कमल
धरा॥ १ ॥श्रीभुगमेश्वर अभयप्र
दाता२ सत्वउद्धारण दुर्गनिहरण·घप
गनिनाशन मोक्षप्रदाता॥ २ ॥अमि
ताभश्चिरेश्वर निर्मलहृदया२श्रीका
रुणेश्वर अधिनिजनाथः॥ ३ ॥
अकमहाभय भवभयनाशनः२श्रीज
मजोकि·श्वर·सुरनरपूजितः॥ ४ ॥
आद्यनेपालिक वसुइनु नगचिकूर२मा

धवसितगंगासुतनिथिमानिवारे॥ ५॥
इतिश्रीलोकेश्वरस्तुतिसमाप्तम्॥ ॥
उज्ञिमंश्री॥
ॐनमोवुद्धाय॥उज्ञिमंश्रीवोधिमहिरुन
पूर्वप्रणादितपुरुषं॥सत्वसहस्रकोटिधा
त·षड्विकारप्रकंपितं॥ १ ॥श्रीशा
क्यसिंहंप्रणम्यनाथं पुण्यकायगुणोद
धिं२दानशीलक्षेमवीर्यध्यानप्रज्ञास
मागतं॥ २ ॥लोभमोहविषयकामं रा
गद्वेषविनाशनं२ पुण्यप्रज्ञावलेन निर्जि
त सर्वसत्वहितंकरं॥श्रीशाक्यसिंहं ×
॥ ३ ॥देवमानवयक्षवन्दित·गरुडकिं
न्नरमहोरगं२देवमानवअसुरतिर्यक्

पननर्द्ध सुजानिकं ॥ श्रीशाक्यसिंहं × ॥
४ ॥ ब्रह्मप्सरं कपिलघोषं सन्वज्ञानेसु
गणिनकं २ गन्धर्वदानव असुर वासुकि
भक्षिणीधार वन्दितं ॥ श्रीशाक्यसिंहं ×
॥ ५ ॥ द्वात्रिंशत्पुरुषलक्षणा अशी
तिव्यंजनलंकृते २ सिंहकायं सुबाहुयु
कं धर्मकाय महाबलं ॥ श्रीशाक्यसिंहं
× ॥ ६ ॥ स्वर्णनेत्रपत्रोरिधारिन वस्त्र
दानसुचीवरं २ रत्नकुण्डल मुकुटक २
रिटन मुकुटपानसुशोभितं ॥ श्रीशाक्य
सिंहं × ॥ ७ ॥ चतुर्विंशति देवभवने
भव कोटि सुजानिकं २ त्रायत्रिंशतिको
२ पापं मार भंग विध्वंसनं ॥ श्रीशाक्य

सिंहं ४॥ ८ ॥मार अंगनरूपसुन्दरीका
मध्यानु विमोहितं २ ज्येस्तवजिरणीबज्रुनश्रु
त्वा वृद्धरूपकुरूपकं ॥ श्रीशाक्यसिंहं॥ ९
॥करुणाकरुणाविलापयुक्तं मूढबाल
अज्ञानिकं २ कनेस्त वज्रणीवचनश्रुत्वा
दिव्यरूपसुरूपकं ॥श्रीशाक्यसिंहं ४॥
१० ॥दहिनदिशा श्रीखण्डलेपन·वाम
शास्त्रप्रहारणं २ दहिन वामक शस्त्रच
रणुन मेकभूनशरीरकं॥ श्रीशाक्यसिं
हं॥ ११ ॥पुष्पधूपनैवेद्यदीपं सुगन्ध
माल्यविलेपनं २ छत्रध्वजपताकचामर
वजुघण्टसुशोभितं॥ श्रीशाक्यसिंहं ४॥
१२ ॥वृद्धवृद्धसुमरनिनं आयुआरोग्य

...पारं ॥ श्रीज्ञानकसिंहं × ॥ १३ ॥ इति
श्री...गीतस्तोत्रं समाप्तम् ॥ ॥

ॐ नमो वागीश्वराय ॥

...दिदेव मनुजासुर पूजितं च । ज्ञानादि
...निलयं गुणराजमन्तं ॥ ज्ञानाधिपं
...मंगलवृद्धिदं तं । वागीश्वरं सुरगु
रुं सततं नमामि ॥ १ ॥ वेदादिशास्त्र
...नाखिलमंत्रविज्ञं स्तोत्रोकथादिभि
...गीतश्राद्धं ॥ यः कीर्त्तयन्ति मनसो
...नाद्यविज्ञं । वागीश्वरं × ॥ २ ॥ ज्ञान
...भानशरीरमचिन्त्यबुद्धिं वाचस्पतिं दि
...भविशालकीर्त्तिदं तं ॥ ज्ञानेश्वरं त्रिभुव
नेसचराचरान्तं । वागीश्वरं × ॥ ३ ॥

रत्नादिशिल्पपरिकल्पनपूरणीयं चित्रं
विचित्रितनगराजनमाननीयं ॥ सर्वज्ञ
कारकधराहृदिब्रह्मपुत्रं ० वागीश्वरं ०॥
४ ॥ चर्य्याविधिरधिपतिं स्थिरधैर्य्यबु
द्धिं ध्यानाधिपं विविधिनासुखदं जनीयं
॥ विश्वाधिपतिंसनगरूभवने निपूनं ० वागी
श्वरं ०॥ ५ ॥ वाणीपतिभुजेचेनत्व
येवागृच्चायं पुस्तिकपाणिमसिसंक्र
मनदधानं ॥ नुभ्यंनमोनमोनमश्चराणा
रविन्दं ० वागीश्वरं ०॥ ६ ॥ इतिश्री
वागीश्वरवर्णनास्तोत्रं समाप्तं ॥ ॥

बलिप्रमुख ॥

ॐ नमोवक्राय ॥ बलिप्रमूखदैत्यानां न

[illegible]नां॥ वांछानाथयोजातो॰वु
[illegible]मामयहं॥ १ ॥झांकारस्योपदेश्री
[illegible]पनिकृत्याय यः॥ मायादेवीसुसंजातो
॰[illegible]मेन×॥ २ ॥अलंपुत्रेणाभन्येन
[illegible]नित्वलेनच॥ इत्थं विनुपदेशं यो॰
[illegible]मेनं×॥ ३ ॥अहिंसापरमोधर्मः स्वा
[illegible]पश्यतां परं॥ इत्युवाच हि यो भक्ता
न॰ शुक्रमेनं×॥ ४ ॥ किमिदं सुखसं
[illegible] ज्ञानमेव परं सुखं॥ इतिप्रोवाच यो
[illegible]न॰ शुक्रमेनं×॥ ५ ॥अलंराज्येन
[illegible]: कष्टं मोक्षसाधनं॥ इतिप्रपं
[illegible]येन॰ शुक्रमेनं×॥ ६ ॥गर्भवा
[illegible] मायाजालानिरर्थकः॥इ

निसिद्धांनिनंयेन॰वुद्धमेनं× ॥ ७ ॥ इन्द्रो
छत्रधरोयस्य देवायस्यसुसेवकाः॥येनसं
मोहितादैत्यान्॰वुद्धमेनं× ॥ ८ ॥ वंशी
यद्वेदपाठेन धानासंरक्षनीहरिः॥द
रिद्रत्रिशूलीयस्याभूत्॰वुद्धमेनं× ॥ ९
॥सुमतीसिवनलक्ष्मी॰वर्णितंस्तोत्रमेन
त्॥निखिलभुवनभर्तुर्वुद्धदेवस्यभक्त्या॥
पठतिविमलवुद्धिःश्रद्धयायःप्रभाते॰वि
दधतिकिलवासं सिद्धयस्तस्यहस्ते॥ १०
॥निखिलनृपतिमान्य भास्करेन्द्रोनरेन्द्रो
विजितसकलशत्रुं भक्तियुक्तोभवत्सुः॥
ऊहतकृतिनिदेवा मंगलानांनिधानं॰भव
तुसकलदेशेचैषराजासुतोमे॥ ११ ॥

ॐ

इति [illegible] मुखप्रबोधनवृद्धस्तवं समाप्तं ॥

दारिद्र्यपंके ॥

ॐ नमः सर्वज्ञाय ॥ दारिद्र्यपंके संमग्नः संसा
[illegible] ॥ प्रतिज्ञास्त्वामनुस्मृत्वा ०
त्राहि मां हे तथागत ॥ १ ॥ निर्मिरागा
[illegible] हं ॰ अनाथदुःखवेष्टिते ॥ बन्धु
वर्गैः परित्यक्तं ० त्राहि मां × ॥ २ ॥ माता
पिता भगिन्यादि ॰ पुत्रदारसुहृज्जनाः ॥
[illegible] मया दृष्टा ० त्राहि मां × ॥ ३ ॥
[illegible] स्वजनार्थे च सुकृतं कर्म दुष्कृतं
॥ [illegible] पच्येहं ० त्राहि मां × ॥ ४
॥ [illegible] पे महाघोरे नवग्राहे त्रसा
[illegible] ॥ [illegible] भूतोस्म्यहं नाथ ० त्राहि मां ×

॥ ५ ॥जीर्णनौकांसमारूढो महासाग
रलंघने॥दुःखंघोंचमयारब्धं॰ त्राहि
मां×॥ ६ ॥धर्माधर्मनविज्ञोहं गम्या
गम्यनवेदितः॥अचेतनोस्म्यहंनाथ॰
त्राहिमां×॥ ७ ॥मातृघातादिकंपंचा
नन्तर्यंचमयाकृतं॥पच्यामिनरकेघो
रे॰ त्राहिमां×॥ ८ ॥कृतंमयास्तूप
भेदं सांघिकार्थविनाशितं॥कृतोमया
सत्वहिंसा॰ त्राहिमां×॥ ९ ॥इहलोके
सुखैर्हीनः परलोकेनवेदितः॥वेष्ठितं
कर्मसूत्रेण॰ त्राहिमां×॥ १० ॥काशी
पुष्पंयथाकाशे भ्रमन्तेवायुनाहतं॥ई
दृशंजीवितंलोके॰ त्राहिमां×॥ ११ ॥

[illegible]काछन्ना बहुवृक्षसमा
[illegible]॥ पन्थानं नात्र पश्यामि० त्राहि मां०
॥ ११ ॥ अनाथराधसंमोहान् हन्ताका
[illegible]गोमया॥ राजहत्यानदामन्ये०
त्राहि मां× ॥ १२ ॥ नरके पच्यमानस्य
[illegible]त्राता न विद्यते॥ गच्छामि कस्य श
रणं० त्राहि मां× ॥ १४ ॥ वैद्यानां वैद्य
[illegible]त्वं सर्वव्याधिचिकित्सकः॥ लोक
[illegible]भवत्राता त्रैलोके सचराचरं ॥
१५ ॥ इति नरकोद्धारणस्तोत्रं समाप्तं॥

पूर्वदिगंपति॥

ॐ [illegible]पालेभ्यः॥ पूर्वदिगंपति इ
[illegible]पालं॥ पीतवर्णं सर्वाभिनं॥ रह

स्तिवाहनवज्रहस्तं नमामिश्रीसुरनाथं
॥ॐ॥स्वारगा स्वारगा लोकपालं॥ १ ॥
अग्निदिगंपति अग्निदेवता रक्तवर्णासु
शोभितं२ छागवाहन·शक्तिहस्तं·नमा
मिश्रीकृशासनं॥स्वारगा२४॥ २ ॥द
क्षिणदिगंपति धर्मराजं·नीलवर्णासुर
शोभितं२ महिषवाहन दण्डहस्तं·नमा
मिश्रीयमराजं॥स्वारगा२४॥ ३ ॥नै
ऋत्यदिगंपति राक्षसेन्द्रं·नीलवर्णासुशो
भितं२ प्रेतवाहन खड्गहस्तं नमामिश्री
नैऋत्यराजं॥स्वारगा२४॥ ४ ॥प
श्चिमदिगंपति वरुणनागं श्वेतवर्णासु
शोभितं२ मंगलवाहन नागहस्तं नमा

मिश्री वासुकिराजं॥ स्मरणाय२४॥ ५ ॥
वायव्य दिगंपति भीममुरुतिं· धूम्राम
वर्णप्रभाभिनं२ मृगवाहन ध्वजहस्तं
नमामि श्री वायुदेवं॥ स्मरणाय२४॥ ६
॥ उत्तर दिगंपति कुबेरमुरुतिं· कुंकुमव
र्णप्रभाभिनं२ अश्ववाहन गडाहस्तं न
मामि श्री यक्षराजं॥ स्मरणाय२४॥ ७ ॥
ईशान दिगंपति महेश्वरं· स्फटिकवर्ण
प्रभाभिनं२ वृषवाहन त्रिशूलहस्तं· नमा
मि श्री त्रैलोक्यनाथं॥ स्मरणाय२४॥ ८ ॥
ऊर्ध्व दिगंपति आदिनारायण· श्यामवर्ण
प्रभाभिनं२ कूर्मवाहन चक्रहस्तं नमामि
श्री दामोदरं॥ स्मरणाय२४॥ ९ ॥ठ

ह्रीं दिगंपति ब्रह्मेश्वरं पीनवर्णास्तुकोभि
तं हंसवाहन पुस्तकहस्तं नमामि श्री
निरंजनं ॥ स्मरणा २ ४ ॥ १० ॥ इति लो
कपालस्तव समाप्तं ॥ ॥ ॥

भुवनत्रयवन्दित ॥

ॐ नमो लोकनाथाय ॥ भुवनत्रयवन्दित
लोकगुरुं अमराधिपतिस्तुतिब्रह्मवरं
॥ मुनिराजवरं जनिसिद्धिकरं प्रणमा
म्यवलोकितनाथकरं ॥ १ ॥ सुगन
मजरूपसुरूपधरं वरुलक्षणभूषि
तदेहधरं ॥ अमिताभतथागतमोलिधे
रं कनकाङ्गविभूषितवामकरं ॥ २
॥ कुटिलामलपिंगलधूम्रजटं शङ्खवि

नसमचन्द्रपूर्णमुखं ॥ कमलायतलोचन
चा[illegible]वां हिमरवराशुविपाण्डुरगण्डपुटं
॥ ३ ॥ मृगराजविबोध्वनवक्त्रपुटं · प्रथ
मा[illegible]गारं जिनरागसमम ॥ अधरं जितवं
धुक,पुष्पसमं सरदंबुदगर्ज्जितमेघरुतं ॥
४ ॥ बहुरत्नवि[illegible]न बाहुयुगे · ननुकोम
लसाङ्गुलयाशितलं ॥ मृगचर्मणिवेष्ठि
तवामतनुं · शुभकुण्डलमण्डितगण्डयु
गं ॥ ५ ॥ विमलंकमलोदरनाभितलं · म
णिमणि[illegible]नमेखलहेमवरम ॥ कटिवेष्ठि
[illegible]वस्त्रधरं · जिनज्ञानमहोदधिपा
[illegible] ॥ ६ ॥ जनध्यानसमाधिविहारकरं
[illegible]गुरुनाथकरं ॥ घटपा[illegible]नं

परिपूर्णकिरं चतुर्ब्रह्मविहारविवेकधरं
॥ ७ ॥ बहुपुण्यसमर्पाजितलब्धवरं ज्वर
व्याधिहरं शुभकान्तिकरं ॥ वरसौख्यक
रं त्रिभवान्तकरं खचरं सुचरं सुतिदेह
धरं ॥ ८ ॥ विविधाकुलनिर्जितमारब
लं दशपारमिता परमार्थकरं ॥ सुविशुद्ध
मनोहररूपधरं नथनाह्वयज्ञानविबोध
करं ॥ ९ ॥ कटनूपुरशोभितपादयुगं ग
जराजविडम्बितहंसगतिं ॥ परिपूर्णमहा
मृतलब्धधृतिं क्षीरोदजलार्णवनित्यरतिं
॥ १० ॥ भवसागरलंघितपारगतिं वर्षो
दकचन्द्रसमानमतिं ॥ श्रीयोतलकांचनि
वासरतिं करुणामलचंचरचारुहरं ॥

११ ॥इत्यार्य्यावलोकितेश्वरस्य चन्द्रका
लाभिधा विरचितंस्तोत्रंसमाप्तं ॥ ॥
अतसिकु ॥
ॐ नमो बुद्धाय ॥ अतसिकुसुमसंकाशदेहं·
भूस्पर्शमुद्राविराजमानं ॥ कुरयान्तविनिर्ज्जितं·
नमामि श्री अक्षोभ्यमूर्त्तिं ॥ ध्रु ॥ सुग
तस्य रत्नमहोत्सवं ॥ १ ॥ वरदकृतन
रलोक, सं· मोक्षवांछितमानसं· स्वामिच
रणसंरत्नश्री ॥ ध्रु २ ॥ दक्षिणमुखश्री
रत्नसंभवं· विभवसंपद्दायकं ॥ उदित
दिनार्ककाशदेहं· नमामितुरंगवाहनं ॥
ध्रु, ॥ ३ ॥ नवउदितार्कविकिरणदेहं·
ध्यानमुद्राधारिनं ॥ मयूरवाहनसंस्थितं

नमामिश्रीअमिताभं॥ कु ॥ ४ ॥मर
कणिमयआलंकृतं· हरिनवर्णविराजि
तं॥उत्तरमुखश्रीअमोघसिद्धिं· नमामि
श्रीगरुडवाहनं॥ कु ॥ ५ ॥कुन्दकुसुम
तुषारदेहं त्रिदशभवप्रतिपालितं॥सिं
हवाहन ध्यानमुरति· नमामिश्रीवैरोच
नं॥ कुं ॥ ६ ॥गगनबिन्दुकुमारवदन·
वत्सरा श्रीनेपालसं॥ गीनग्रन्थिनकुसुम
माला· नमामिश्रीधर्मधातुसं॥ कु ॥७
॥इतिपंचबुद्धस्तवंसमाप्तं॥ ॥

स्तुत्वाप्रणम्य

स्तुत्वाप्रणम्य अभयंकर सर्वसत्वान्संपू
र्णचन्द्रवदनाम्बुजपत्रनेत्रं॥सर्वज्ञज्ञा

नमस्करोमि ननसुक्तिमार्गं· त्वंपद्मपाणिं वर
भूषितनानाराश्मिं॥ १ ॥उत्तुंगनासंवरपी
नवपीनवक्रं रक्ताधरं हिमतुषारमिवस
रनं ॥नालिभ्रभ्रं भ्रतिधरं मधुरंच्चवाक्यं
त्वंपद्मपाणिंमृदुवर्णभ्रूरंनमामि॥ २ ॥
जटाधरं कनककान्तिविभूषितांगं· नेत्रत्रयं
मटविभूषितनवालचन्द्रं ॥कृष्णाजिनाव
मरंचसुवर्णवर्णं· त्वंपद्मपाणिंमृदुगात्र
नतंनमामि॥ ३ ॥त्वंलोकनाथमवलो
कितनामधेयं यज्ञोपवीतसदचंचल
मानं॥चिन्तामणिप्रवरकुण्डलघृष्ट
गण्डं· त्वंपद्मपाणिंस्तुतिसर्वरूतंनमामि
॥ ४ ॥त्वंज्ञानराश्मिवरभाषितसर्वस
त्वानां संसारपंकतिमिरार्णवमग्नसत्वां

॥आलोकिते पथमतुत्तरबोधिमार्गं· तंप
द्मपाणिं वरमार्गददं नमामि॥ ५ ॥ग
त्वा च येन नरकेषु अवीचिमग्नां शीतीकृ
तं हृदविशालरूहंसपद्मं॥येनारकिंस
कलदुःख विनाशयन्ति तंपद्मपाणिं न
रकाग्निशमं नमामि॥ ६ ॥संत्राशयन्ति
यमपालकभग्नभूमौ हेधर्मराजमिव आ
गतकामरूपी॥येकर्मभूमिमिवध्वंसित
नेत्रिमित्तं· तंम्पद्मपाणिं हतसासनं तंन
मामि॥ ७ ॥गत्वा च येन वररूपमनोहरा
य· त्रैलोकनाथमभयंकर सर्वसत्वान्॥
दुःखार्णवं तव स्मरन्ति विमुक्तिदुःखं· तं
पद्मपाणिं हतकिल्विषं तं नमामि॥ ८
॥त्वं प्रेतलोके गतये करुणावशेन·

भवीमुखैउदरपर्वतजीर्णमङ्कुः ॥क्षुद्दुः
[illegible]पीडितशरीरतृषानुराणां· तंपद्मपाणिं
[illegible]करंनमामि॥ ९ ॥अन्योन्यभक्ष
[illegible]पीडितप्रेतसत्वान् संधीयतेकरहै
[illegible]नदीभिः॥पुष्टिंशरीरहतभुक्षतृ
[illegible]णां तंपद्मपाणिंहतभुक्षतृषान्नमा
मि॥ १० ॥गत्वातमंभुवनवर्जितचन्द्र
सूर्य चिन्तामणिज्वलितरत्नप्रभावभा
[illegible]॥तंयक्षराक्षसगणेश्वरणेनमस्ते स्त
[illegible]पाणिंनमभग्नकृतंनमामि॥ ११ ॥
गत्वा[illegible]येनबलिभग्नमनोरथस्य यद्दीय
[illegible]पिण्डपात्रं॥धर्मकथेनप
[illegible]नबेन्द्र·तंपद्मपाणिंवरधर्मद
[illegible]नमामि॥ १२ ॥गत्वाचयेनदिविकुंड

लंदेवपुत्रंदानस्यहीनक्षुधपीडितदुःखि
नंच॥तस्याश्चयान्तिवरुणहिसमृद्धिरत्नं·तं
पद्मपाणिंधनवृद्धिकरन्नमामि॥ १३ ॥
त्वंकामरूपमुपदर्शितराक्षसीनां·कामा
वशेनपरितंनवराक्षसीभिः॥ध्यानस्थचि
त्तंपरिवर्जितधर्मचित्तं नमस्यपद्मपाणिं व
हुरूपधरन्नमामि॥ १४ ॥विगणमूत्रभू
मिक्रिमिकोटिसमद्रवन्तं·गत्वाचयेनअं
लिरूपमनुस्मरन्ति॥निस्सारितंपुराणयुगा
यद्दत्तिधर्म नमस्यपद्मपाणिंवहुगात्रधरंन
मामि॥ १५ ॥दुर्भिक्षमार्गदपिशाचभ
वेषवृष्टिःक्षुत्तृष्णादुःखभयपीडितसर्व
सत्वान्॥धान्यादिवृष्टिवरुणेहिसमृद्धि
रत्नं नमस्यपद्मपाणिंवलकाहुणिकन्नमामि

॥ १६ ॥ नानाहृअभ्रकृनरूपमहाजवेन
[illegible]गयेन वणिजं भयराक्षसीभिः ॥ आनी
[illegible]पवनवेगमहासमुद्रात् नमस्त्रपाणिं
[illegible]भयंनमामि ॥ १७ ॥ त्रैधातुके
[illegible]नि विमुक्तिदुःखं नानासमाधि
[illegible]विचित्रगात्रं ॥ नरीमरूपेनिव
[illegible]नि अनेकसत्वा स्तम्यम्नपाणिं क्षयना
[illegible]कान्नमामि ॥ १८ ॥ नानाभयेनवस्म
[illegible]विमुक्तदुःखं राजस्वदस्युभयराक्ष
[illegible]भूते: ॥ नद्यापि मार्गहनकंदरच्चा
[illegible] नमस्त्रपाणिं अभयंचददन्नम
[illegible] ॥ १९ ॥ व्याघ्रिभयं खगपिशाचसडा
[illegible] आपत्ति व्याधिभयकष्टवियोग
[illegible] ॥ रोगक्लेशावकुपाप विनाशयंनं

नम्यम्रपाशिं भयनाशकरन्नमामि॥ २०॥
शुक्लाष्टमीनियमधर्मअमोघपाशं यस्तु
करोतिर्जितमिन्द्रियब्रह्मचर्य्यं॥सर्वंपु
णास्यनिजगे यदशेषपापं नम्यम्रपाशिं
वरदायसदानमामि॥ २१ ॥नित्यंवशी
नैगुरणसमृद्धिनपोनरेषु· नानाद्रुमति
लकचंपकपालिजातैः॥रम्यातडागवि
जसापदशोवयन्ति नम्यम्रपाशिं निरयेषु
सदानमामि॥ २२ ॥देवैःकुबेरवरुणैर्य्य
मवन्दितस्य गन्धर्वयक्षमुनिदानववन्दि
तस्य॥यक्षैश्चनागमनुजैश्चनमस्करोमि
भूतैःपिशाचगरुडैश्चनमस्करोमि॥ २३
॥यत्पथ्यतेनुकरुणास्तवनित्यकालेशा
न्तिंचपुष्टिंधनवृद्धिसमृद्धिकामाः॥आयु

र्विभूतिवकृपुत्रविशालभोगी प्रयान्तिका
लमोपपश्यन्तिलोकनाथं॥ २४ ॥संकी
र्त्तयन्तिनवीर्यमहानुभावं रात्रौदिवाच
नवनाममनुस्मरन्ति॥दुःस्वप्नविघ्नभय
पापविनाशयन्ति गृह्णन्तिदेवसततंतव
रक्षयन्ति॥ २५ ॥इतिश्रीआर्य्यावलो
कितेश्वरस्य वसुधराविरचितकरुणा
स्तवसमाप्तः॥ ॥शुभं॥ ॥

वसुमत्यां॥ ०

ॐनमःसप्तबुद्धेभ्यः॥ वसुमत्यांसमुत्पन्नं
नेमोद्विपश्चिनंजिनं॥अशोकवृक्षमाश्रि
त्यं आदियुगाधिपंसदा॥ १ ॥अरुणो
दे समुत्पन्नं पुण्डरीकस्यमूलगं॥सत्वार्थ
कारिणांनाथं नमामिशिखीजिनं॥

१५ ८४ ०

॥ २ ॥नोपमायांसमुत्पन्नं शालवृक्षस
माश्रितं॥महाकारुणिकंनाथं विश्वभुवं
जिनंनमे॥ ३ ॥क्षेमावत्यांसमुत्पन्नं शि
रीषमूलआश्रितं॥सत्वानामघहर्त्तारं क
कुच्छन्दं जिनन्नमे॥ ४ ॥सोभावत्यांस
मुत्पन्नं औदुम्बर समाश्रितं॥कनकमुनिं
दारिद्रघ्नं नमे संपत्तिकंजिनं॥ ५ ॥वा
राणस्यांसमुत्पन्नं न्यग्रोधमूल माश्रितं॥
सर्वसौख्यप्रदातारं काश्यपंश्रीघनंनमे॥
६ ॥जातंकपिलवास्तुन्यां अश्वत्थमूल
आश्रितं॥नमेशाक्यमुनिंबुद्धं संसारोद्द
धियारगं॥ ७ ॥सप्तबुद्धस्तुतिरिदं यःप
ठेत्त्रुतिवासरे॥सर्वपापविनिर्मुक्तं आ
युरारोग्यवर्द्धनं॥ ८ ॥इतिसप्तबुद्ध

स्तोत्रंसमाप्तं॥ ॥

प्रणमामिजिनं ०

ॐ नमः शाक्यसिंहाय॥ प्रणमामिजिनं सु
गतं सगतं · तपनीयहिरण्यशरीर छ
विं॥ वरचक्रविभूषितपाणितलं · सस्तु
गसुरमानुषपापहरं॥ १ ॥प्रणमा
मि मुनीन्द्रगुरुं ललितं · सततात्कलनि
र्जितमारबलं॥ दशपारमिताप्रतिबोध
करं · चतुरार्य्यविबोधकरं सुकरं॥ २॥
प्रणमामि हितंकर देवनरं · सनरामर
पूजितदेववरं॥ अमराधिकमङ्गलनिर्हे
तुकरं · सजरामयमृत्युभयादिहरं॥
३॥प्रणमामि सुखाकरबोधिभरं · स्व

सुखंप्रदर्शी करुणाश्रयय:। प्रपरदु:खम
महाचुचकारजनु गतदोष निराकुलश्चाक
कुले॥ प्रणमामिचलोकहितायगृहं। वि
जहौपितरं रमणीसहितं॥ हयकण्ठक
छन्दकदेववृतो। मुदितान्यगमत्सुवने
विजने॥ ५ ॥प्रणमामि नपोवनसुभ
मितं। प्रचकारचयेनमहर्षिगणान॥ च
तुरार्य्यकब्रह्मविहार परान्। सुगतस्मरेरौ
कनपोवृत्तिकोन॥ ६ ॥प्रणमामिमहा
द्रुममूलवरे। सुतृणासनसंश्रित वज्र
वरं॥ ज्ञानकोटिसुमारवलात्महरं। ज्ञान
संख्यतथागतप्रवृतं॥ ७ ॥प्रणमा
मिसुवुद्धगयाभिगता। ऋषिपत्तनादिकभद्धि

क पंचदाना:॥ वणिजार्ष्पितपंच सुधाम
मन. अभयाय सभोजन भक्षकृतं॥ ८
॥ प्रणमामि सुवर्ज्जितधर्मवरं· मृगदाव
वने जनशासनके॥ विधिशाक्यसुरासुर
लोककृतं· स्वशरीर महोज्ज्वल सर्वदि
शं॥ ९ ॥ ग्रहनिर्मितकं सुगन स्तवकं
पठनं कृतने किलयो मनुजः॥ ग्रहरोग
भयेन हिनस्य सदा· सनुयास्यति मोक्ष
परिसुपुरे॥ १० ॥ इति ग्रहनिर्मि
तवृक स्तोत्रं समाप्तं॥ ॥ ॥
सम्वत १०४५ मिति भाडवकृष्णा या २
स· थ पुस्तक सिद्धयेका॥ लिखितं गं
भालामा· व· नीलवज्र॥ ॥दा
नपति· भाला सिद्धया· तलाभर· साहु

हर्षसुन्दर पुण्यसुन्दर निमसया उत्तरा
पंथ रत्नाकर जाजास· पाठ यायेत·
दयेकाजुल ॥ धगुपुराणं सर्वसत्वश्रा
सिउद्धार जुये माल ॥ ॥ शुभम ॥

यो किताब को अर्थ
पोस्ता धर्म पुस्तक संपति

